विकसित पङ्कजकर्णिका। इति दुर्गादासः ॥

कस इ ल ङ ध्वंसे। गतौ। इति कविकल्पद्रुमः ॥ शाते च। (अदां-आत्मं-सकं-सेट्। इदित्।) इ कंस्यते। ल ङ कंस्ते हरिः कंसम्। चकारात् गतौ च। शात इह ध्वंसना। इति दुर्गादासः ॥

कस ल ङ ध्वंसे। गतौ। इति कविकल्पद्रुमः ॥ (अदां-शाते च। आत्मं-सकं-सेट्।) ल ङ कस्ते हरिः कंसम्। चकारात् गतौ च। शात इह ध्वंसना। इति दुर्गादासः ॥

कसः, पुं, (कसति विकसतीति। कस + अच्। कसति विकसति स्वर्णादिरत्र वा। कस + आधारे अच्।) कषः। इत्यमरटीकायां भरतः ॥ कष्टिपातर इति भाषा। पूर्व्वोक्तधात्वर्थोऽप्यत्र ॥ (यथा नैषधे २। ६९।
"कसपाषाणनिभे नभस्तले" ॥)

कसनोत्पाटनः, पुं, (उत्पाटयतीति उत्पाटनः। उत् + पाटि + ल्युः। कसनस्य कासरोगस्य उत्पाटनः नाशकः।) वासकवृक्षः। इति शब्दचन्द्रिका ॥

कसिपुः, पुं, (कशति शास्ति दुःखम्। कश गतिशासनयोः निपातनात् सिद्धम्।) कशिपुः। अन्नम्। इति जटाधरः ॥

कसेरुः, पुं, (कं शृणातीति शृगिहिंसायां बाहुलका-दुप्रत्यये प्रकृतेरेरुङादेशः। निपातनात् शस्य सत्वम्।) कशेरुः। केशुर इति भाषा। तत्पर्य्यायः। गुण्डकन्दः २ क्षुद्रमुस्ता ३ कसेरुका ४ शूकरेष्टः ५। सुगन्धिः ६ सुकन्दः ७ कसेरुकः ८। अस्य गुणाः। कषायत्वम्। अल्पमधुरत्वम्। अल्पकटुत्वम्। रक्तपित्तप्रशमनत्वम्। शीतत्वम्। दाहश्रमापहत्वञ्च। इति राजनिर्घण्टः ॥

कसेरुका, स्त्री, (कसेरुरेव। स्वार्थे कन् स्त्रियां टाप्।) कसेरुः। पृष्ठास्थि। इति राजनिर्घण्टः ॥

कस्तीरं, क्ली, रङ्गम्। इति हेमचन्द्रः ॥ (अस्य पर्य्यायो यथा,—वैद्यकरत्नमालायाम्।
"रङ्गं वङ्गञ्च कस्तीरं स्वद्रङ्गं पुस्तपिच्चटम्" ॥)

कस्तुरिका, स्त्री, (कसति गन्धोऽस्याः दूरतः। कस + ऊर। तुट् च। स्वार्थे कन् टाप् च पृषोदरादित्वात् साधुः।) कस्तूरी। इति भूरिप्रयोगः ॥

कस्तूरिका, स्त्री, (कस्तूरी + स्वार्थे कन् टाप् पृषोदरादित्वात् साधुः।) कस्तूरी। इति रत्नमाला ॥ (यथा, माघे। ४। ६१।
"कस्तूरिकामृगविमर्द्दसुगन्धिरेति" ॥
अस्या गुणादयः कस्तूरीशब्दे ज्ञातव्याः। वैद्यकरसेन्द्रसारसंग्रहे वृहज्ज्वरचूडामणिरसे अस्याः प्रयोगो यथा "कस्तूरिकाविद्रुमरौप्यलौहं"। इत्यादि।)

कस्तूरी, स्त्री, (कसति गन्धोऽस्याः। कस + खर्ज्जूरादित्वात् ऊरः। ङीप् तुट् पृषोदरादित्वात् साधुः।) मृगस्य नाभीजातसुगन्धिद्रव्यम्। तत्पर्य्यायः। मृगनाभिः २ मृगमदः ३। इत्यमरः। २। ६। १२९। मृगः ४ मृगी ५ नाभिः ६ मदः ७। इति भरतः ॥ वातामोदः ८ योजनगन्धिका ९। इति रभसः ॥ मदनी १० गन्धकेलिका ११ वेधमुख्या १२ मार्जारी १३ सुभगा १४ बहुगन्धदा १५ सहस्रवेधी १६ श्यामा १७ कामान्धा १८ मृगाण्डजा १९ कुरङ्गनाभिः २० ललिता २१ श्यामला २२ मोदिनी २३ कस्तूरिका २४ कस्तुरिका २५ नाभी २६ लता २७ योजनगन्धा २८ मार्गः २९ गन्धबोधिका ३० कालाङ्गी ३१ धूपसञ्चारी ३२ मिश्रा ३३ गन्धपिशाचिका ३४ इति शब्दरत्नावली ॥ अस्या गुणाः। सुरभित्वम्। तिक्तत्वम्। चक्षुर्हितत्वम्। मुखरोगकिलासकफदौर्गन्ध्यवन्ध्यालक्ष्मीमलापहत्वञ्च। इति राजनिर्घण्टः ॥ रक्तपित्तच्छर्द्दिनाशित्वम्। इति राजवल्लभः ॥ तद्भेदाः। खरिका १ तिलका २ कुलत्था ३ पिण्डा ४ नायिका ५। अपि च।
"कपिला पिङ्गला कृष्णा कस्तूरी त्रिविधा क्रमात्।
नेपालेऽपि च काश्मीरे कामरूपेऽपि जायते ॥
कामरूपोद्भवा श्रेष्ठा नैपाली मध्यमा भवेत्।
काश्मीरदेशसम्भूता कस्तूरी ह्यधमा स्मृता" ॥
इति राजनिर्घण्टः ॥ (अस्याः पर्य्याया गुणा उत्पत्तिश्च यथा,—भावप्रकाशस्य पूर्व्वखण्डे १ भागे।
"मृगनाभिर्मृगमदः कथितस्तु सहस्रभित्।
कस्तूरिका च कस्तूरी वेधमुख्या च सा स्मृता ॥
काश्मरीकपिलच्छाया कस्तूरी त्रिविधा स्मृता।
कामरूपोद्भवा श्रेष्ठा नैपाली मध्यमा भवेत् ॥
कामरूपोद्भवा कृष्णा नैपाली नीलवर्णयुक्।
काश्मीरदेशसम्भूता कस्तूरी ह्यधमा मता ॥
कस्तूरिका कटुस्तिक्ता क्षारोष्णा शुक्रला गुरुः।
कफवातविषच्छर्द्दिशीतदौर्गन्ध्यशोषहृत्" ॥)

कस्तूरीमल्लिका, स्त्री, (कस्तूरीगन्धयुक्ता मल्लिका।) मृगमदवासा। इति राजनिर्घण्टः ॥

कश्मलं, क्ली, (कश गतिशातनयोः + कल + मुट् च। निपातनात् शस्य षः।) कश्मलम्। मोहः। इत्यमरटीकायां रायमुकुटः ॥

कह्लारं, क्ली, (कस्य जलस्य हार इव के जले ह्लादते वा इति। क + ह्लाद + पचाद्यच् पृषोदरादित्वात् साधुः।) श्वेतोत्पलम्। सुँदि इति भाषा। तत्पर्य्यायः। सौगन्धिकम् २। इत्यमरः १। १०। ३६ ॥ (कत्तृणम् ३। गन्धकञ्च ४। इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥ यथा, भागवते ४। ६। १८।
"कुमुदोत्पलकह्लारशतपत्रवनर्द्धिभिः" ॥)
तत्पुष्पगुणाः। कषायत्वम्। मधुरत्वम्। शीतत्वम्। पित्तकफरक्तनाशित्वञ्च। इति राजवल्लभः ॥

कह्वः, पुं, (के जले ह्वयति शब्दायते स्पर्द्धते वा। क + ह्वे + कः।) बकपक्षी। इत्यमरः ॥ २। ५। २२ ॥

कांसीयं, क्ली, (कंसस्य विकारः इति छः।) कांस्यम्। इति राजनिर्घण्टः ॥

कांस्यं, क्ली, (कंसाय पानपात्राय हितं कंसीयं तस्य विकारः इति। "कंसीयपरशव्ययोरिति"। ४। ३। १६८ यञ् छस्य लुक् च। यद्वा कंसमेव इति स्वार्थे यञ् प्रत्ययः।) ताम्ररङ्गमिश्रितधातुः। काँसा इति भाषा। तत्पर्य्यायः। कंसम् २ कंसास्थि ३ ताम्रार्द्धम् ४। इति त्रिकाण्डशेषः ॥ सौराष्ट्रकम् ५ घोषम् ६ कांसीयम् ७ वह्निलोहकम् ८ दीप्तिलोहम् ९ घोरपुष्पम् १० दीप्तिकांस्यम् ११ कास्यम् १२। अस्य गुणाः तिक्तत्वम्। उष्णत्वम्। चक्षुर्हितकारित्वम्। वातकफविकारनाशित्वम्। रूक्षत्वम्। कषायत्वम् रुचिकारित्वम्। लघुत्वम्। दीपनत्वम्। पाचनत्वम्। पथ्यत्वञ्च। इति राजनिर्घण्टः ॥ अम्लरसत्वम्। विशदत्वम्। लेखनत्वम्। सारकत्वम्। पित्तनाशित्वम् इति राजवल्लभः ॥ दृढ़देहायुर्वृद्धिकारित्वम्। इति सुखबोधः ॥
("उपधातुर्भवेत् कांस्यं द्वयोस्तरणिरङ्गयोः।
कांस्यस्य तु गुणा ज्ञेयाः स्वयोनिसदृशा जनैः।
संयोगजप्रभावेण तस्यान्येऽपि गुणाः स्मृताः ॥
कांस्यङ्कषायन्तिक्तोष्णं लेखनं विशदं सरम्।
गुरुनेत्रहितं रूक्षं कफपित्तहरम्परम्" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे १ भागे ॥)
तत्शोधनमारणमाह।
"अनेनैव विधानेन कांस्यं विड्गन्धलेपितम्।
मारयेद्बुद्धिमान् वैद्यो मृतं भवति चूर्णवत्" ॥
अन्यच्च।
"द्विक्षारं पञ्चलवणं सप्तधास्तेन भावयेत्।
कांस्यारकुटपत्राणि तेन कल्केन लेपयेत्।
बद्धा गजपुटे पश्चाच्छुद्धिमायाति नान्यथा" ॥
अन्यच्च।
"ताम्रवच्छोधनं कृत्वा ताम्रवन्मारयेद्बुधः" ॥
अन्यच्च।
"कज्ज्वलीं तत्समां दत्त्वा मर्द्दयेन्निम्बुकद्रवैः।
एवं पुटत्रयेणैव निरुत्थं भस्म जायते" ॥
इति सुखबोधः ॥

कांस्यकारः, पुं, (कांस्यं तत्पात्रं करोतीति। कांस्य + कृ + अण्।) कंसकारः। इति जटाधरः। काँसारि इति भाषा ॥

कांस्यनीलः, पु, (कांसेन कृतः नीलः।) अञ्जनभेदः। नीलतुत्थम्। तत्पर्य्यायः। मूषातुत्थम् २ हेमतारम् ३ वितुन्नकम् ४ इति हेमचन्द्रः ॥ (कांस्योद्भवाञ्जनवन्नीलः इति विग्रहे वाच्यलिङ्गत्वम्। यथा, गोः रामायणे ४। ३९। २३।
"कांस्यनीलो हरिर्नीलः कोटिभिर्दशभिर्वृतः" ॥
क्वचित् कांस्यनील इति पाठः ॥)

काकं, क्ली, सुरतबन्धः। (काकस्य समूहः इति सङ्घार्थे अण्।) काकसमूहः। इति मेदिनी ॥ (ईषत्कं जलम् कोः कादेशः। ईषज्जलम्। इति व्याकरणम् ॥)

काकः, पुं, (कायते शब्दायते। कै शब्दे "इण्भीकापाशल्यतिमर्च्चिभ्यः कन्"। उणां-३। ४३। इति कन्।) स्वनामख्यातपक्षिविशेषः। काग् इति भाषा। तत्पर्य्यायः। करटः २ अरिष्टः ३ बलिपुष्टः ४ सकृत्प्रजः ५ ध्वाङ्क्षः ६ आत्मघोषः ७ परभृत् ८ बलिभुक् ९ वायसः १०। इत्यमरः। २। ५। २० ॥ वातजवः ११ बलः १२ दीर्घायुः १३ सूचकः १४ कृष्णः १५ ग्रामीणः १६ पिशुनः १७ कटखादकः १८ द्विकः १९ कागः २०। इति